# Shri Tikakritpada Ashtakam

# श्रीटीकाकृत्पादाष्टकम्

## Document Information

Text title : Shri Tikakritpada Ashtakam

File name : TIkAkRRitpAdAShTakam.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : gurjAlA(bALA)chArya

Proofread by : Pranav Tendulkar

Description/comments : Mantra Stotra Sangraha

Acknowledge-Permission: Vishwa Madhwa Maha Parishat

Latest update : November 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 14, 2021

*sanskritdocuments.org*

# श्रीटीकाकृत्पादाष्टकम्

योऽधत्त प्रथमो गवां गुणनिधेर्गोविन्दभक्तो गुरो-
भारान् हृदये बहिश्च गुरुणा प्रेम्णा भविष्यद्विधेः ।
टीकाऽस्मद्वचसामुदेष्यति वरे गौः प्रौढशिष्येष्विति
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ १॥

ऊढः सत्तुरगं पिपासुरुदकं गौर्वत् पिबन्नास्यतः
शिष्यस्ते भविता पुराऽर्जुन इव द्रोणस्य तस्माद्यशः ।
भूयादित्युदितेन सौख्यवचसा योऽक्षोभ्यराजेक्षितः
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ २॥

किं ते भूप पुराऽऽर्जितं शुभकृतं यस्त्वां वृणीतुं मनो
दध्रेऽक्षोभ्यमुनीश्वरेण वशिना शापे तथाऽनुग्रहे ।
भूतानागतवेदिनेति चतुरैः कैश्चिन्निजैश्चोदितः
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ ३॥

इत्येवं बहुधा वशीकृतमना गत्वा समीपं गुरो-
नत्वा तं पठ शास्त्रमद्भुतमिदं सम्यग्विरक्तो भव ।
श्रीरामं सुखतीर्थपूजितपदं भक्त्याऽर्चयेतीरितः
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ ४॥

इत्याद्युक्तममोघचित्तवचसां विश्वस्य वेदोपमं
साष्टाङ्गं प्रणिपत्य तं तु समयं तुर्याश्रमं प्रापितः ।
व्याजह्रे न मया किमप्यधिगतं सन्ध्यादिकं वेति यः
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ ५॥

भोस्त्वं श्रीसुखतीर्थतीर्थमतुलं टीकिष्यसेऽनुग्रहात्
तस्यैवेह सुधां प्रदास्यसि जने योग्ये दिवीन्द्रो यथा ।
आदिष्टो गुरुणा जयेति गदितस्त्र्यष्टादशग्रन्थकृत्
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ ६॥

तर्काशीविषमूर्ध्नि ताण्डवमहो श्रीव्यासराड्केकिनो
यस्य श्रीसुधया व्यधुर्विहरणाच्छ्रान्तात्मनां यस्य च ।
नानादुर्मतखण्डनेऽद्भुतसुधाविप्लुड्झरण्याऽपि मे
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ ७॥

विद्यारण्यजयं शृगालमठगः स्तम्भो यदीयः स्फुटं
वक्त्यद्यापि वसन्नथोपकुरुतेऽनाथान् स्वभक्तांश्च यः ।
वृष्टिग्राम इतोऽपि यच्छुभजपव्याख्यापदाङ्कं गुहात्
छिन्द्याच्छ्रीजयनाकिराण्ममम दयावज्रेण पापाचलम् ॥ ८॥

इत्येतद्गुरुजालबालरचितं भक्त्या पठनष्टकं
कागिन्यामुदये विधाय विधिवत् स्नानं नमन् माधवम् ।
नत्वा कोत्तलवायुजं रघुपतिं रक्षन्तमक्षोभ्यराट-
नित्यानुव्रतमञ्जसा श्रुतिपसत्यानन्दमुख्यान् यतीन् ॥ ९॥

अश्वत्थं च परीत्य सप्तसु दिनेषु श्रीजयेन्द्रं नमन्
सद्यः पापविमुक्तिमेति भवति श्रीमांश्च सश्रीः सुधीः ।
यो वा दीनमना अनन्यशरणो भक्त्याऽलसो मादृशः
सिद्धिं याति ततोऽधिकां बुधजनः साक्षात् सुधा साक्षिणी ॥

इति गुर्जाला(बाळा)चार्यकृत श्रीटीकाकृत्पादाष्टकं सम्पूर्णम् ।

Proofread by Pranav Tendulkar

*Shri Tikakritpada Ashtakam*
pdf was typeset on November 14, 2021

Please send corrections to *sanskrit@cheerful.com*